# શિવ પન્ચાક્ષર નક્ષત્રમાલા સ્તોત્રમ

શ્રીમદાત્મને ગુણૈકસિન્ધવે નમઃ શિવાય
ધામલેશધૂતકોકબન્ધવે નમઃ શિવાય .
નામશેષિતાનમદ્ભવાન્ધવે નમઃ શિવાય
પામરેતરપ્રધાનબન્ધવે નમઃ શિવાય .. ૧..
કાલભીતવિપ્રબાલપાલ તે નમઃ શિવાય
શૂલભિન્નદુષ્ટદક્ષફાલ તે નમઃ શિવાય .
મૂલકારણાય કાલકાલ તે નમઃ શિવાય
પાલયાધુના દયાલવાલ તે નમઃ શિવાય .. ૨..
ઇષ્ટવસ્તુમુખ્યદાનહેતવે નમઃ શિવાય
દુષ્ટદૈત્યવંશધૂમકેતવે નમઃ શિવાય .
સૃષ્ટિરક્ષણાય ધર્મસેતવે નમઃ શિવાય
અષ્ટમૂર્તયે વૃષેન્દ્રકેતવે નમઃ શિવાય .. ૩..
આપદદ્રિભેદટઙ્કહસ્ત તે નમઃ શિવાય
પાપહારિદિવ્યસિન્ધુમસ્ત તે નમઃ શિવાય .
પાપદારિણે લસન્નમસ્તતે નમઃ શિવાય
શાપદોષખણ્ડનપ્રશસ્ત તે નમઃ શિવાય .. ૪..
વ્યોમકેશ દિવ્યભવ્યરૂપ તે નમઃ શિવાય
હેમમેદિનીધરેન્દ્રચાપ તે નમઃ શિવાય .
નામમાત્રદગ્ધસર્વપાપ તે નમઃ શિવાય
કામનૈકતાનહૃદ્દુરાપ તે નમઃ શિવાય .. ૫..
બ્રહ્મમસ્તકાવલીનિબદ્ધ તે નમઃ શિવાય
જિહ્મગેન્દ્રકુણ્ડલપ્રસિદ્ધ તે નમઃ શિવાય .
બ્રહ્મણે પ્રણીતવેદપદ્ધતે નમઃ શિવાય
જિંહકાલદેહદત્તપદ્ધતે નમઃ શિવાય .. ૬..
કામનાશનાય શુદ્ધકર્મણે નમઃ શિવાય

સામગાનજાયમાનશર્મણે નમઃ શિવાય .
હેમકાન્તિચાકચક્યવર્મણે નમઃ શિવાય
સામજાસુરાઙ્ગલબ્ધચર્મણે નમઃ શિવાય .. ૭..
જન્મમૃત્યુઘોરદુઃખહારિણે નમઃ શિવાય
ચિન્મયૈકરૂપદેહધારિણે નમઃ શિવાય .
મન્મનોરથાવપૂર્તિકારિણે નમઃ શિવાય
સન્મનોગતાય કામવૈરિણે નમઃ શિવાય .. ૮..
યક્ષરાજબન્ધવે દયાલવે નમઃ શિવાય
દક્ષપાણિશોભિકાઞ્ચનાલવે નમઃ શિવાય .
પક્ષિરાજવાહહૃચ્છયાલવે નમઃ શિવાય
અક્ષિફાલ વેદપૂતતાલવે નમઃ શિવાય .. ૯..
દક્ષહસ્તનિષ્ઠજાતવેદસે નમઃ શિવાય
અક્ષરાત્મને નમદ્બિડૌજસે નમઃ શિવાય .
દીક્ષિતપ્રકાશિતાત્મતેજસે નમઃ શિવાય
ઉક્ષરાજવાહ તે સતાં ગતે નમઃ શિવાય .. ૧૦..
રાજતાચલેન્દ્રસાનુવાસિને નમઃ શિવાય
રાજમાનનિત્યમન્દહાસિને નમઃ શિવાય .
રાજકોરકાવતંસભાસિને નમઃ શિવાય
રાજરાજમિત્રતાપ્રકાશિને નમઃ શિવાય .. ૧૧..
દીનમાનવાલિકામધેનવે નમઃ શિવાય
સૂનબાણદાહકૃત્કૃશાનવે નમઃ શિવાય .
સ્વાનુરાગભક્તરત્નસાનવે નમઃ શિવાય
દાનવાન્ધકારચણ્ડભાનવે નમઃ શિવાય .. ૧૨..
સર્વમઙ્ગલાકુચાગ્રશાયિને નમઃ શિવાય
સર્વદેવતાગણાતિશાયિને નમઃ શિવાય .
પૂર્વદેવનાશસંવિધાયિને નમઃ શિવાય

સર્વમન્મનોજભઙ્ગદાયિને નમઃ શિવાય .. ૧૩..
સ્તોકભક્તિતોऽપિ ભક્તપોષિણે નમઃ શિવાય
માકરન્દસારવર્ષિભાષિણે નમઃ શિવાય .
એકબિલ્વદાનતોऽપિ તોષિણે નમઃ શિવાય
નૈકજન્મપાપજાલશોષિણે નમઃ શિવાય .. ૧૪..
સર્વજીવરક્ષણૈકશીલિને નમઃ શિવાય
પાર્વતીપ્રિયાય ભક્તપાલિને નમઃ શિવાય .
દુર્વિદગ્ધદૈત્યસૈન્યદારિણે નમઃ શિવાય
શર્વરીશધારિણે કપાલિને નમઃ શિવાય .. ૧૫..
પાહિ મામુમામનોજ્ઞદેહ તે નમઃ શિવાય
દેહિ મે વરં સિતાદ્રિગેહ તે નમઃ શિવાય .
મોહિતર્ષિકામિનીસમૂહ તે નમઃ શિવાય
સ્વેહિતપ્રસન્ન કામદોહ તે નમઃ શિવાય .. ૧૬..
મઙ્ગલપ્રદાય ગોતુરંગ તે નમઃ શિવાય
ગઙ્ગયા તરઙ્ગિતોત્તમાઙ્ગ તે નમઃ શિવાય .
સઙ્ગરપ્રવૃત્તવૈરિભઙ્ગ તે નમઃ શિવાય
અઙ્ગજારયે કરેકુરઙ્ગ તે નમઃ શિવાય .. ૧૭..
ઈહિતક્ષણપ્રદાનહેતવે નમઃ શિવાય
આહિતાગ્નિપાલકોક્ષકેતવે નમઃ શિવાય .
દેહકાન્તિધૂતરૌપ્યધાતવે નમઃ શિવાય
ગેહદુઃખપુઞ્જધૂમકેતવે નમઃ શિવાય .. ૧૮..
ત્ર્યક્ષ દીનસત્કૃપાકટાક્ષ તે નમઃ શિવાય
દક્ષસપ્તતન્તુનાશદક્ષ તે નમઃ શિવાય .
ઋક્ષરાજભાનુપાવકાક્ષ તે નમઃ શિવાય
રક્ષ માં પ્રપન્નમાત્રરક્ષ તે નમઃ શિવાય .. ૧૯..
ન્યઙ્કુપાણયે શિવંકરાય તે નમઃ શિવાય

સંકટાબ્ધિતીર્ણકિંકરાય તે નમઃ શિવાય .
કઙ્કભીષિતાભયંકરાય તે નમઃ શિવાય
પઙ્કજાનનાય શંકરાય તે નમઃ શિવાય .. ૨૦..
કર્મપાશનાશ નીલકણ્ઠ તે નમઃ શિવાય
શર્મદાય નર્યભસ્મકણ્ઠ તે નમઃ શિવાય .
નિર્મમર્ષિસેવિતોપકણ્ઠ તે નમઃ શિવાય
કુર્મહે નતીર્નમદ્વિકુણ્ઠ તે નમઃ શિવાય .. ૨૧..
વિષ્ટપાધિપાય નમ્રવિષ્ણવે નમઃ શિવાય
શિષ્ટવિપ્રહૃદ્ગુહાચરિષ્ણવે નમઃ શિવાય .
ઇષ્ટવસ્તુનિત્યતુષ્ટજિષ્ણવે નમઃ શિવાય
કષ્ટનાશનાય લોકજિષ્ણવે નમઃ શિવાય .. ૨૨..
અપ્રમેયદિવ્યસુપ્રભાવ તે નમઃ શિવાય
સત્પ્રપન્નરક્ષણસ્વભાવ તે નમઃ શિવાય .
સ્વપ્રકાશ નિસ્તુલાનુભાવ તે નમઃ શિવાય
વિપ્રડિમ્ભદર્શિતાર્દ્રભાવ તે નમઃ શિવાય .. ૨૩..
સેવકાય મે મૃડ પ્રસીદ તે નમઃ શિવાય
ભાવલભ્ય તાવકપ્રસાદ તે નમઃ શિવાય .
પાવકાક્ષ દેવપૂજ્યપાદ તે નમઃ શિવાય
તવકાઙ્ઘ્રિભક્તદત્તમોદ તે નમઃ શિવાય .. ૨૪..
ભુક્તિમુક્તિદિવ્યભોગદાયિને નમઃ શિવાય
શક્તિકલ્પિતપ્રપચભાગિને નમઃ શિવાય .
ભક્તસંકટાપહારયોગિને નમઃ શિવાય
યુક્તસન્મનઃસરોજયોગિને નમઃ શિવાય .. ૨૫..
અન્તકાન્તકાય પાપહારિણે નમઃ શિવાય
શાન્તમાયદન્તિચર્મધારિણે નમઃ શિવાય .
સંતતાશ્રિતવ્યથાવિદારિણે નમઃ શિવાય

જન્તુજાતનિત્યસૌખ્યકારિણે નમઃ શિવાય .. ૨૬..
શૂલિને નમો નમઃ કપાલિને નમઃ શિવાય
પાલિને વિરિચિતુણ્ડમાલિને નમઃ શિવાય .
લીલિને વિશેષરુણ્ડમાલિને નમઃ શિવાય
શીલિને નમઃ પ્રપુણ્યશાલિને નમઃ શિવાય .. ૨૭..
શિવપચાક્ષરમુદ્રાં
ચતુષ્પદોલ્લાસપદ્યમણિઘટિતામ .
નક્ષત્રમાલિકામિહ
દધદુપકણ્ઠં નરો ભવેત્સોમઃ .. ૨૮..
ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છંકરભગવતઃ કૃતૌ
શિવપચાક્ષરનક્ષત્રમાલાસ્તોત્રં સંપૂર્ણમ ..